अनुक्रमांकः ..................................
निरीक्षकस्य हस्ताक्षरम् ..........................

**Paper Code**
**MV-204**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा - मईमासः - 2019**

**एम.ए. संस्कृत-व्याकरणम्, (सत्रम् : द्वितीयसत्रम)**
**चतुर्थपत्रम् - संस्कृतव्याकरणम् (घ)**

**समयः - होरात्रयम्** **अधिकतमाङ्काः - 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' 'घ' इत्याख्येषु चतुष खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

## खण्डः क
### (दीर्घोत्तरीयप्रश्नाः)

**निर्देशः** पृष्टेषु चतुर्षु द्वौ द्वीर्घप्रश्नौ समाधेयौ । **(2×15=30)**

1. 'अनभिहिते' इत्यत्र किं परिगणनम्? किमर्थञ्च ?
2. गत्यर्थकर्मणीति सूत्रं विविच्यताम्?
3. द्विगुरेकवचनमिति सूत्रस्य किं प्रयोजनम्?
4. 'अव्ययादाप्सुपः' इति सूत्रेण क्रियमाणं लुग्वचनं सार्थकमनर्थकं वेति?

## खण्डः ख
### (लघूत्तरोयप्रश्नाः)

**निर्देशः** पृष्टेषु सप्तसु चत्वारो लघुप्रश्नाः समाधेयाः। **(4×5=20)**

1. नाव्ययीभावादित्यत्र योगविभागस्य किं प्रयोजनम् ?
2. 'डाविकारस्य शित्करणं सवदिशार्थम्' कोऽभिप्रायः ?
3. 'अर्थर्चादयः' इति वार्त्तिकं वक्तव्यं न वेति ?
4. यस्य व भावन भावलक्षणमित्यत्र 'भावलक्षणे सप्तमीविधाने अभावलक्षणे उपसङ्ख्यानम्' इति वार्तिकस्य कोऽभिप्रायः ?
5. 'अक्षि काणमस्य' इत्यत्र येनाङ्गविकार इति तृतीया कस्मान्न ?
6. 'क्रियामध्ये' इति वात्तिकस्य किं प्रयोजनं सप्तमीपञ्चम्यौ कारकमध्य इतिसूत्रे ?
7. 'अकाकारयोः प्रयोगे प्रतिषेधो नेति वक्तव्यम्' इत्यस्य सोदाहरणं व्याख्यानं कर्त्तव्यम्?

## खण्डः ग
### (अतिलघूत्तरीयाः प्रश्नाः)

**निर्देशः** पृष्टेषु त्रयोदशसु दश अतिलघुप्रश्नाः समाधेयाः। **(10×01=10)**

1. 'उभयप्राप्तौ' इत्यत्र कः समासः ?
2. 'न लोकाव्यय.' इत्यत्र तृन्निति किम् ?
3. निकषायोगे कतमा विभक्तिः ?
4. मन्यकर्मण्यनादर इति सूत्रस्य कान्युदाहरणानि ?
5. संज्ञोऽन्यतरस्यामिति सूत्रे प्रथमपदे का विभक्तिः ?
6. 'द्वितीया ब्राह्मणे' इत्यस्य किमुदाहरणम् ?

7. ल्यब्ग्रहणेन किं ज्ञाप्यते अदो जग्धिरिति सूत्रे ?

8. द्वन्द्वश्च प्राणितूर्येत्यत्र तूर्यस्य किमुदाहरणम् ?

9. 'प्राच्यभरतेषु' इत्यत्र कः समासः ?

10. प्रघस इत्यत्र को धातुः, कश्च प्रत्ययः ?

11. दशपूली इत्यत्र कः स्त्रीप्रत्ययः ?

12. कर्तृकर्मणोः कृतीत्यत्र कृतिग्रहणेन किं गृह्यते ?

13. 'षष्ठी शेषे' इत्यत्र शेषः कः ?

## खण्डः घ

## (वस्तुनिष्ठप्रश्नाः)

**निर्देशः** पृष्टा वस्तुनिष्ठप्रश्नाः समाधेयाः। (10×01=10)

1. द्विगुरिति सञ्ज्ञा कस्य ?

   (अ) द्वन्द्वस्य (ब) बहुव्रीहिः

   (स) तत्पुरुषस्य (द) अव्ययीभावस्य

2. किं शुद्धम् ?

   (अ) द्विपात्री (ब) द्विपात्रः

   (स) द्विपात्रम् (द) न किमपि

3. 'अनिरवसितानामित्यत्र कुतोऽनिरवसितत्वं ज्ञायते ?

   (अ) आर्यावर्तात् (ब) गहप्रदेशात्

   (स) याज्ञात्कर्मणः (द) पात्रात्

4. क्तप्रत्ययः कस्मिन्नर्थे ?

   (अ) कर्मणि (ब) कर्त्तरि

   (स) भावे (द) सर्वेषु

5. अपवर्ग कः ?

   (अ) निष्ठा (ब) अपरिसमाप्तिः

   (स) विचारणा (द) न किमपि

6. कतमस्साधुः ?

   (अ) शरचापम् (ब) चापशरम्

   (स) उभयम् (द) नोभयम्

7. कृद्योगे कर्मणि कतमा विभक्तिः ?

   (अ) द्वितीया (ब) षष्ठी

   (स) पञ्चमी (द) सप्तमी

8. 'क्तस्य च वर्तमाने' इत्यनेन सूत्रेण किं क्रियते ?

   (अ) विभक्तिविधानम् (ब) समासविधानम्

   (स) समासनिषेधः (द) विभक्तिनिषेधः

9. द्वितीयाध्याये चतुर्थपादे कति सूत्राणि ?

   (अ) 76 (ब) 83

   (स) 85 (द) 87

10. सुबामन्त्रित इति सूत्रम् ..........................

   (अ) स्वरविधायकम् (ब) विभक्तिविधायकम्

   (स) समासविधायकम् (द) आगमविधायकम्

---------------x---------------